कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र M.2027 विषय काव्य
नाव. वैराग्यशतकम् (भर्तृहरिकृत) M 43.
लेखक/लिपीकार प्रथम २ पृष्ठे गहाळ
पृष्ठ 19 काळ — पूर्ण/अपूर्ण
Checked

मे

निधनौकांतंतो निस्पृहः॥ संप्राप्तानिपुरानसंप्रतिनवप्राप्तोदृढंप्रत्ययो
वांछामात्रपरिग्रहाण्यपिपरित्यक्तुंनशक्तावयं॥१९॥ धन्यानांगिरिकंदरे
षुवसतांज्योतिःपरंध्यायतामानंदाश्रुकणान्पिबंतिशकुनानिःशंक
मंकेशयाः॥ अस्माकंतुमनोरथोपरचितप्रासादवापीतटक्रीडाकान
नकेलिकौतुकजुषामायुःपरंक्षीयते॥२०॥ स्तनौमांसग्रंथीकनककल
शावित्युपमितौमुखंश्लेष्मागारंतदपिचशशांकेनतुलितं॥ स्रवन्मूत्र
क्लिन्नंकरिवरकरस्पर्द्धिजघनमहोनिंद्यंरूपंकविवरविशेषैर्गुरुकृतं॥२१

वै०

अजानन्माहात्म्यं पतति शलभस्तीव्रदहने स मीनोप्यज्ञानाद्बडिशयुतम
श्नाति पिशितं ॥ विजानंतोप्येते वयमिह विपज्जालजटिलान्न मुंचामः का
मानहह गहनो मोहमहिमा ॥ १२ ॥ तुंगं वेश्म सुताः सतामभिमताः संख्या
तिगाः संपदः कल्याणी दयिता वयश्च नवमित्यज्ञानमूढो जनः ॥ मत्वा वि
श्वमनश्वरं निविशते संसारकारागृहे संदृश्य क्षणभंगुरं तदखिलं धन्यस्तु संन्यस्य
ति ॥ १३ ॥ अथ याच्यादैन्यदूषणं ॥ दीना दीनमुखैः स्वकीयशिशुकैराकृष्टजी
र्णांबरा क्रोशद्भिः क्षुधितैर्निरन्नजठरैर्दृश्येत चेद्गेहिनी ॥ याच्याभंगभयेन ॥ ३ ॥

सदा क्लिन्नव्याधिविकारविह्वलगिरां नामापि न श्रूयते ॥ १९ ॥ फलं स्वे
च्छालभ्यं प्रतिवनमखेदं क्षितिरुहां पयः स्थाने स्थाने शिशिरमधुरं पु
ण्यसरितां ॥ मृदुस्पर्शा शय्या सुललितलतापल्लवमयी सहंते संतापं त
दपि धनिनां द्वारि कृपणाः ॥ २० ॥ येवर्द्धंते धनपतिपुरः प्रार्थनादुःखभा
जो ये बाल्पत्वं दधति विषयाक्षेपपर्यस्तबुद्धेः ॥ तेषामंतःस्फुरितहसि
तं वासराणां स्मरेयं ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः ॥ २१ ॥ नि
श्वासाहारमैदं नमपत्रनिरलंजीतिच्छिदं सर्वेतोडुर्मात्सर्यमदाभिमानमथ

वै०

नंदुःखौघविध्वंसनं ॥ सर्वत्रान्वहमप्रयत्नसुलभं साधुप्रियं पावनं तं शंभोः
सत्रमवार्यमक्षयनिधिं शंसंति योगीश्वराः ॥ २२ ॥ अथ भोगास्थैर्य्यं भोगे
रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं माने दैन्यभयं बले रिपुभयं रू
पे जराया भयं ॥ शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद्भयं सर्वं व
स्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयं ॥ २३ ॥ आक्रांतं मरणेन जन्म ज
रयात्युज्वलं यौवनं संतोषो धनलिप्सया शमसुखं प्रौढांगनाविभ्रमैः
लोकैर्मत्सरिभिर्गुणास्तुपवनो व्यालैर्नृपा दुर्जनैरस्थैर्येण विभूतयो ॥ ५ ॥

प्युपहता ग्रस्तं न किं केन वा ॥ २५ ॥ आधिव्याधिशतैर्जनस्य विविधैरा
रोग्यमुन्मूल्यते लक्ष्मीर्यत्र पतंति विविधद्वारा इव व्यापदः ॥ जातं जात
मवश्यमाशु विवशं मृत्युः करोत्यात्मसात्तत्किं नाम निरंकुशेन विधिना
यन्निर्मितं सुस्थिरं ॥ २६ ॥ भोगास्तुंगतरंगभंगचपलाः प्राणाः क्षणध्वं
सिनः स्तोकान्येव दिनानि यौवनसुखं प्रीतिः प्रियेष्वस्थिराः ॥ तत्संसा
रमसारमेवमखिलं बुध्वा बुधा बोधका लोकानुग्रहपेशलेन मनसा
यत्नः समाधीयतां ॥ २७ ॥ भोगा मेघवितानमध्यविलसत्सौदामिनीचं

वै०

चलाआयुर्वायुविघट्टिताभ्रपटलीलीनांबुवद्भंगुरं लोलायौवनला
लसास्तनुभृतामित्याकलय्यद्रुतंयोगेधैर्यसमाधिसिद्धिसुलभेबुद्धिं
विदध्वंबुधा॥२०॥ आयुःकल्लोललोलंकतिपयदिवसस्थायिनी
यौवनश्रीरर्थाःसंकल्पकल्पाघनसमयतडिद्भंगुरोभ्रविभ्रमास॥ सं
ठाश्लेषोपिगूढंतदपिचनचिरंयत्प्रियाभिःप्रयुक्तंब्रह्मण्यासक्तचि
त्ताभवतभवभयांभोधिपारंतरंतु॥२१॥ दुःखंस्त्रीकुक्षिमध्येप्रथम
मिहभवेगर्भवासोनराणांबालत्वेचापिदुःखंमललुलितवपुस्त्री ॥६॥

पयःपानमिश्रं॥ तारुण्येचापिदुःखंभवतिविरहजंवृद्धभावोप्यसारः
संसारेरेमनुष्यावदतयदिसुखंस्वल्पमप्यस्तिकिंचित्॥२२॥ व्याघ्रीव
तिष्ठतिजरापरितर्जयंतीरोगाश्चशत्रवइवप्रहरंतिदेहं॥ आयुःपरि
स्रवतिभिन्नघटादिवांभोलोकस्तथाप्यहितमाचरतीतिचित्रं॥२३॥
भोगाभंगुरवृत्तयोबहुविधास्तैरेवचायंभवस्तत्कस्येहकृतेपरिभ्र
मतहेलोकाः॥ कृतंचेष्टितैः॥ आशापाशशतोपशांतिविशदंचेतःस
माधीयतांकामोच्छित्तिवशेस्वधामनियदिश्रद्धेयमस्मद्वचः॥२४॥ ब्रह्मे

वै.

ज्ञादिमरूणानन्तरणकरुणानयत्र स्थितोममनेयच्छाया ह्रिरसान्नवंति किमवा
स्त्रिलोक्यराज्यादय:॥ भोग: कोपि स एक एव परमो नित्योदितो जंभते हेसा
धो क्षणभंगुरे नदिनेरे भोगे रतिं माकृथा॥३३ विरमत बुधा योषित्संगात्सु
खा क्षणभंगुरात्कुरुत करुणा मैत्री प्रज्ञा वधूजनसंगमं॥ न खलु नरके हारा
क्रांतं तदा घनस्तनमंडलं शरणमथवा श्रोणिमंडलं रणन्मेखलं॥३४ कंथा
प्रावरणं कृदंनमशनं तांबूलहीनं मुखं वांछेद्का उदिता विशीर्णमुत्संजा
याजरामकेटी॥ वृत्ति: कापि विशेषणेन [illegible] वारं का वपुधूसरं स्रदानां सुख ॥७॥

लिस्सयानन्तुनथा प्पास्थागृहस्थाश्रमे॥३५॥ अथ कालमस्मि॥ सारम्पान
गरीमक्रान्सनरपति॥ सा मंत्रचक्रं च तत पार्श्वेनस्यच सा विदग्धपरिषत्ताश्चंद्र
बिंबानना॥ उक्ति: स च राजपुत्र निवस्तेवं दिनस्ता: कथा: सर्वपस्यवर्णा
दगात्स्मतिपदं कालायनस्मैनम:॥३६॥ यत्रानेका॥ क्वचिदपि च गृहे तत्र तिष्ट
स्यैको यत्राप्येकस्तदनु निवस्तत्र चांते न चैका:॥ इत्थं चो भोरजनि दिव
सौ दोलयन्द्वाविबाक्षौ काल:॥ कालासरु बहुकल॥ क्रीडति प्राणिसारे॥ ३
ऽत्रादित्यस्य गतागतैरहरह: संक्षीयते जीवितं व्यापारैर्बहुकार्यभारगुरुभि:

वै०

कालोनविज्ञायते॥दृष्ट्वाजन्मजराविपत्तिमरणंत्रासश्चनोत्पद्यतेपीत्वामोहम यीप्रमादमदिरामुन्मत्तभूतंजगत्॥३८॥रात्रिःसैवपुनःसएवदिवसोमत्वामु धाजंतवोधावंत्युद्यमिनस्तथैवनिभृतप्रारब्धतत्तत्क्रिया॥व्यापारैःपुन रुक्तभूतविषयैरित्थंविधेनामुनासंसारेणकदर्थिताःकथमहोमोहान्न लज्जामहे॥३९॥नध्यातंपदमीश्वरस्यविधिवत्संसारविच्छित्तयेस्वर्गद्वारक पाटपाटनपटुर्धर्मोपिनोपार्जितः॥नारीपीनपयोधरोरुयुगलंस्वप्नेपिनालिं गितंमातुःकेवलमेवयौवनवनच्छेदेकुठारावयं॥४०॥नाभ्यस्ताभुविवादिवृं ॥८॥

दद्मनीविद्याविनीतोचिताखड्गाग्रैःकरिकुंभपीठदलनैर्नाकंननीतंय शः॥कांताकोमलपल्लवाधररसःपीतोनचंद्रोदयेतारुण्यंगतमेवनिष्फ लमहोशून्यालयेदीपवत्॥४१॥विद्यानाधिगताकलंकरहिताविस्तंचनो पार्जितंशुश्रूषापिसमाहितेनमनसापित्रोर्नसंपादिता॥आलोलायतलोच नायुवतयःस्वप्नेपिनालिंगिताःकालोयंपरपिंडलोलुपतयाकाकैरिवप्रे र्यते॥४२॥वयंयेभ्योजाताश्चिरपरिगतायेचखलुतेसमंयैःसंवृद्धाःस्म रणपदवींतेपिगमिताः॥इदानीमेतेस्मःप्रतिदिनसमासन्नपतनागता

वि०

स्नुसावस्यांसिकतिमनदीतीरतरुभिः॥४३॥आयुर्वर्षशतंनृणांपरिमि
तंरात्रौतदर्द्धंगतंतस्यार्द्धस्यपरस्यचार्द्धमपरंबालत्ववृद्धत्वयोः॥शेषं
व्याधिवियोगदुःखसहितंसेवादिभिर्नीयतेजीवेवारितरंगबुद्बुद
समेसौख्यंकुतःप्राणिनां॥४४॥अहौवाहारेवाबलवतिरिपौवासुहृ
दिवामणौवालोष्टेवाकुसुमशयनेवादृषदिवा॥तृणेवास्त्रैणेवाम
मसमदृशोयांतिदिवसाःक्वचित्पुण्यारण्येशिवशिवशिवेतिप्रलपतः
॥४५॥प्राणाघातान्निवृत्तिःपरधनहरणेसंयमःसत्यवाक्यंकालेशक्त्या ॥९॥

प्रदानंयुवतिजनकथामूकभावःपरेषां॥तृष्णास्रोतोविभंगोगुरु
षुचविनयःसर्वभूतानुकंपासामान्यःसर्वशास्त्रेष्वनुपहतमतिः
श्रेयसामेषपंथाः॥४६॥अथयतिनृपतिसंवादः॥फलमलमशनाय
स्वादुपानायतोयंशयनमवनिपृष्ठेवाससीवल्कलेच॥ननुधनम
धुपानभ्रांतसर्वेंद्रियाणामविनयमनुमंतुंनोत्सहेदुर्जनानां॥४७॥
विपुलहृदयैर्धन्यैःकैश्चिज्जगज्जनितंपुराविधृतमपरैर्दत्तंचान्यैर्वि
जित्यतृणंयथा॥इहहिभुवनान्यन्येधीराश्चतुर्दशभुंजतेकतिपय

वै०

पुरःस्वाम्येपुंसामेषमदज्वरः॥४८॥त्वंराजावयमप्युपासितगुरुप्रज्ञा
भिमानोन्नताःख्यातस्त्वंविभवैर्यशांसिकवयोदिक्षुप्रतन्वंतिनः
इत्थंमानधनातिदूरमुभयोरप्यावयोरंतरंयद्यस्मासुपराङ्मुखावय
[illegible]मप्येकांततोनिःस्पृहाः॥४९॥अभुक्तायांयस्यांक्षणमपिन
जातंनृपशतैर्भुवस्तस्यालाभेकइवबहुमानःक्षितिभुजां॥तदंशा
स्याप्यंशेतदवयवलेशेपिपतयोविषादेकर्त्तव्येविदधतिजडाःप्रमु
दितमुदा॥५०॥मृत्पिंडोजलरेखयावलयितःसर्वोप्ययंनन्वणुःस्वांशी

कृत्यतमेवसंयुगशतैराज्ञांगणाभुंजते॥येदद्युर्ददतोथवानकिम
पिक्षुद्रादरिद्राभृशंधिग्धिक्कापुरुषाधमान्धनवलंवांछंतितेभ्यो
पिये॥५१॥ननटानविटानगायकामपरद्रोहविरुद्धबुद्धयः॥नृपसंस
दिनामकेवयंस्तनभारानमितानयोषितः॥५२॥सजातःकोप्यासी
न्मदनरिपुणामूर्ध्निधवलंकपालंयस्योच्चैर्विनिहितमलंकारविध
येनृभिःप्राणत्राणप्रवणमतिभिःकैश्चिदधुनानमद्भिःकिंपुं
सामयमतुलदर्पज्वरभरः॥५३॥असीमहिवयंभिक्षामाशावासोव

वै

सीमहि॥ नायीमहिमहीपृष्ठे कुर्वीमहि किमीश्वरैः॥५४॥ अर्थानामी
शितारस्त्वं वयमपि गिरामीश्महे यावदित्थं शूरस्त्वं वादिदर्पज्वरशम
नविधावक्षयं पाटवं नः। सेवंते त्वां धनाढ्या मतिमलहतये मामपि श्रो
तुकामा मय्यप्यास्था न तेच्चेत्त्वयि मम सुतरां नास्ति संसारभेदः॥५५॥ व
यमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या सममिह परितोषो निर्विशेषो
विशेषः॥ स तु भवतु दरिद्रो यस्य तृष्णा विशाला मनसि च परितुष्टे कोऽर्थ
वान्को दरिद्रः॥५६॥ इति यतिनृपतिसंवादपद्धतिः॥ अथ मनःसंबोध ॥११॥

नं परेषां चेतः प्रतिदिवसमाराध्य बहुधा प्रसादं किं नेतुं विशसि हृद
य क्लेशकलितं॥ प्रसन्ने त्वय्यंतः स्वयमुदितचिंतामणिगणे विविक्तः सं
कल्पः किमभिलषितं पुष्यति न ते॥५७॥ एतस्माद्विरमेंद्रियार्थगहनादा
यासकादाश्रयो श्रेयोमार्गमशेषदुःखशमनव्यापारदक्षं क्षणात् स्वा
त्मीभावमुपेहि संत्यज निजां कल्लोललोलां गतिं मा भूयो भज भंगुरां भ
वरतिं चेतः प्रसीदाधुना॥५८॥ मोहं मार्जय तामुपार्जय रतिं चंद्रार्धचू
डामणौ चेतः स्वर्गतरंगिणीतटभुवामासंगमंगीकुरु। को वा वीचिषु

वै॰

बुद्धेदृष्टेवतडिल्लेखवासचस्त्रीषुचञ्चलाजोग्रेष्वचपन्नगेषुचसरिद्वेगे
षुकः प्रत्ययः॥७॥ श्रेयोगीतंसरसकवयः॥ पार्श्वतोदाक्षिणात्याः प्रेंख
लीलावलयरणितंचामरग्राहिणीनां यद्यस्त्येवंकुरुभवरसास्वाद
नेलंपटत्वंनोचेच्चेतःप्रविशसहसानिर्विकल्पेसमाधौ॥१०॥ प्राप्ताःश्रि
यःसकलकामदुघास्ततःकिं न्यस्तंपदंशिरसिविद्विषतांततःकिं सं
तर्पिताःप्रणयिनोविभवैस्ततःकिं कल्पंस्थितंतनुभृतांतनुभिस्त
तःकिं॥११॥ भक्तिर्भवेमरणजन्मभयंहृदिस्थंस्नेहोनबंधुषुनमन्मथ ॥१२॥

जाविकाराः॥ संसर्गदोषरहिताविजनावनांतावैराग्यमस्तिकिमतः
परमर्थनीयं॥१२॥ तस्मादनंतमजरंपरमंविकासितद्ब्रह्मचिंतयकि
मेभिरसद्विकल्पैः॥ यस्यानुषंगिणइमेभुवनाधिपत्यभोगादयःकृप
णलोकमताभवंति॥१३॥ पातालमाविशसियासिनभोविलंघ्यदि
ङ्मंडलंभ्रमसिमानसचापलेन॥ भ्रांत्यापिजातुविमलंकथमात्म
निष्ठंनब्रह्मसंस्मरसिनिर्वृतिमेषियेन॥१४॥ श्रवणंतत्वागास्त्रार्थविचा
रचापलंनिवृत्तनानारसकाव्यकौतुकं॥ निरस्तनिःशेषविकल्पवि

वै०

ष्ठ्वेवंप्रणेतुमभिवांछतिमोहलिनंमनः॥६५॥ भवारण्यंभीमंतनुगृहमि
दंछिद्रबहुलंबलीकालश्चोरोनियतमहितामोहजननी॥ गृहीत्वा
जानासिविरविफलकंजलिकक्ष्वंसमीचीनंकृत्वादृढतरदृश्रोजाग्र
त्तजना॥६६॥ परिभ्रमसिकिंमुधाक्कुटिलचित्तविभ्रान्तंस्वयंभवति
यद्यथ्यतत्तथाभवतिनामया॥ अतीतमननुस्मरन्नतर्कितगमा
गमननुभवामिभोगानहं॥६७॥ चिनश्चिंतयमारंभांसहृदमास्यापि
नीमास्ययात्कृपालच्छकुटीकुटीरविरहव्यापारपण्यांगनं॥ कंथाकं ॥१३॥

चुकिनःप्रक्षिपनवनद्वाराणिवाराणसीरथ्यापंक्तिषुपानपात्रप
तितांभिक्षामपेक्षामहे॥६८॥ इतिमनःसंबोधनपद्धतिः॥ अथनित्यानि
त्यविचारपद्धतिः॥ मानेम्लायिनिखंडितेचवसुनिव्यर्थंप्रयातेर्थिनि
क्षीणेबंधुजनेगतेपरिजनेनष्टेशनैर्यौवने॥ युक्तंकेवलमेवसुधियां
यज्जह्नुकन्यापयः॥ पूतग्रावगिरींद्रकंदरदरीकुंजेषुवासःक्वचित्॥६९॥
तपस्यंतः॥ संतः॥ किमधिनिवसामःसुरनदींगुणोदारान्दारानुतप
रिचरामःसविनयं॥ पिबामःशास्त्रौघानुतविविधयो कोमलतरसा

वै०

न्नविघ्नःकिंकुर्म्मःकतिपयनिमेषायुषिजने॥७०॥यदामेरुःश्रीमान्नि
पततियुगांताग्निनिहतःसमुद्राःशुष्यंतिप्रचुरमकरग्राहनिलयाः
धरागछसंतंधरणिधरपादैरपिधृताशरीरेकावार्त्ताकरिकलभ
कर्णाग्रचपले॥७१॥किंवेदैःस्मृतिभिःपुराणपठनैःशास्त्रैर्महाविस्त
रैःस्वर्गग्रामकुटीनिवासफलदैःकर्मक्रियाविभ्रमैः॥ऋस्मेकंभ
वदुःखभाररचनाविध्वंसकालानलंस्वात्मानंदपदप्रवेशनमि
दंशेषावणिग्वृत्तयः॥७२॥रम्याश्चंद्रमरीचयःकुसुमितारम्यावनां ॥२८॥

न्तस्थलीरम्यःसाधुसमागमःप्रणयिनांरम्याविचित्रागिरः॥कोपो
सादितबाष्पबिंदुतरलंरम्याप्रियायामुखंसर्वंरम्यमनित्यतामुपग
तेचित्तेनकिंचित्पुनः॥७३॥यावत्स्वस्थमिदंशरीरमरुजंयावज्जराद्
रतोयावच्चेंद्रियशक्तिरप्रतिहतायावत्क्षयोनायुषः॥आत्मश्रेयसि
तावदेवविदुषाकार्यःप्रयत्नोमहान्संदीप्तेभवनेहिकूपखननंप्र
त्युद्यमःकीदृशः॥७४॥दुराराध्यःस्वामीतुरगचलचित्ताःक्षितिभुजो
वयंस्थूलेछाःसुमहतिपदेबद्धमनसःजरादेहंमृत्युर्हरतिसकलंजी

वै॰ वित्तमिदं सखेनात्मं क्षेयो जगति विदुषो मत्र तपसः॥ ७५ वलीसितं स्फ
टितिवीक्ष्य त्रिरोरूहाणां स्थानं जरापरिभवस्य तथा पुमांसं॥ आरो
पितास्थिशतकं परिहृत्यपांति चांडालकूपमिव दूरतरं तरूण्यः
॥ ७६ गात्रं संकुचितं गतिर्विगलिता भ्रष्टा च दंतावलीर्दृष्टिर्नश्यति
वर्द्धते बधिरता वक्त्रं च लाला यते॥ वाक्यं नाद्रियते च बांधवजनै
र्भार्या च न सुश्रूषते हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोप्यमित्रा
यते॥ ७७ रम्यं हर्म्यतलं न किं वसतये श्राव्यं न गेयादिकं किं वा प्राण ॥ ७५ ॥

समागमसुखं नैवाधिकं प्रीतये॥ किंतु भ्रांतपतंगपक्षपवनव्यालो
लदीपांकुरछायाचंचलमाकलय्य सकलं संतो वनां तं गता॥ ७८
इति निसानिस्स विचारप्रवृत्ति॥ अथ मिश्रवार्चनप्रवृत्ति॥ स्फुरत्स्फा
रज्योत्स्ना प्रचलितनले कापि पुलिने समुद्घल्कक्लोलध्वनिषुर
जनीषुद्धुसरित॥ भवाभोगोद्विग्नाः शिवशिव सार्तवचसाक
दायास्यामोंतर्गतविकलबाष्पाकुलदृशा॥ ७९ एको देवः केश
वो वा शिवो वा एका नार्यसुंदरी वा दरी वा॥ एको मित्रो नृपति

वै०

वीयतिवाएकोवासः पत्तनंवावनंवा ॥ ८० ॥ वितीर्णेसर्वस्वेतरुणकरुणा
पूर्णहृदयाः स्मरंतः संसारेविपुलपरिणामाबधिगतिं ॥ वयंपुण्येरण्येप
रिणतशरच्चंद्रकिरणैः त्रियामांनेष्यामोहरचरणचित्तैकशरणा ॥ ८१ ॥
द्विजराजमुखीमृगराजकटीगजराजविराजितमंदगति ॥ यदिसावनिता
हृदयेनियताक्वजपः क्वतपः समाधिविधिः ॥ ८२ ॥ एकाकीनिःस्पृहः
शांतः पाणिपात्रोदिगंबरः ॥ कदाहंशंभोभविष्यामिकर्मनिर्मूलनक्षमः
॥ ८३ ॥ जीर्णास्येवमनोगतानिहृदयंयातंचनद्योवनंहंतांगेषुगुणेश्चवंध्य ॥ ८३ ॥

फलतांयातागुणज्ञैर्विना ॥ किंयुक्तंसहसाभ्युपैतिबलवान्कालःकृतांतो
क्षमी विज्ञातंत्रिपुरांतकांघ्रियुगलंमुक्त्वास्तिनान्यागति ॥ ८४ ॥ स्नात्वागांगैः
पयोभिः शुचिकुसुमफलैरर्चयित्वाविभोत्वां ध्यानेध्येयंनिवेश्यक्षितिध
रकुहरग्रावपर्यंकमूले ॥ आत्मारामः फलाशीगुरुवचनरतस्त्वत्प्रसादा
त्स्मरारेदुःखंमोक्ष्येकदाहं समकरचरणेपुंसिसेवासमुत्थं ॥ ८५ ॥ महेश्वरे
वाजगतामधीश्वरेजनार्दनेवाजगदंतरात्मनि ॥ नयोर्नभेदप्रतिपत्तिर
स्तिनयापितस्मिंस्तरुणेंदुशेखरे ॥ ८६ ॥ मातर्लक्ष्मिभजस्वकंचिदपरंमा

वै०

कांक्षिलीमात्समन्तोगेषुस्पृहयालवामस्तववन्नीकोनिस्पृहाणामपि ॥ सद्यः
स्फुटनपलाशपत्रपुटिकापात्रेपवित्रीकृतेनिक्षान्नकृतिंरवसंप्रतिवयंन्नी
क्षांसमीहामहे ॥८७॥ किंकदर्पपरकदर्थयसिरेकोदंडटंकारितैनारेकोकि
ककोमलैःकलरवैः किंवावृथावल्गसि ॥ मुग्धेसिद्धविदग्धमुग्धमधुरै
र्लोलैःकटाक्षैरलंचेतश्चुंबितचंद्रचूडचरणंध्यानामृतेवर्त्तते ॥८८॥ क
दावाराणस्याममरतटिनीरोधसिवसन्वसानःकौपीनंशिरसिविदधा
नोंजलिपुटं ॥ अयेगौरीनाथत्रिपुरहरशंभोत्रिनयनप्रसीदेतिक्रोशन्निमि ॥८९॥

षमिवनेष्यामिदिवसान ॥९०॥ गंगातीरेहिमगिरिशिलाबद्धपद्मासनस्य
ब्रह्मज्ञानाभ्यसनविधिनायोगनिद्रांगतस्य ॥ किंतैर्भाव्यंममसुदिवसैर्यत्र
तेनिर्विशंकाःसंप्राप्स्यंतेजरठहरिणाःश्रृंगकंडूविनोदं ॥९१॥ पाणिःपात्रंपवि
त्रंभ्रमणपरिगतंभैक्ष्यमक्षय्यमन्नंविस्तीर्णंवस्त्रमाशादशकममलंत
ल्पमस्वल्पमुर्वी ॥ येषांनिःसंगतांगीकरणपरिणतिस्वांतसंतोषिणस्तेध
न्याःसंन्यस्तदैन्यव्यतिकरनिकराःकर्मनिर्मूलयंति ॥९२॥ चांडालःकिम
यंद्विजातिरथवाशूद्रोथकिंतापसः ॥ किंवातत्त्वविवेकपेशलमतिर्योगी

वै०

म्बरः कोपि किं ॥ २२ ॥ सुसल्पविवेकजस्य सुखैर्या संजायमाना ॥ ज्ञानैर्नौ कृतैः प
थिनैव तुष्टमनसो यां ति स्वपं योगिनः ॥ २३ ॥ पाणिं पात्रयतां निसर्गशुचिनां
भैक्षेण संतुष्यतां यत्र क्वापि निषीदतां बहुतृणं विश्वं सुखं पश्यतां ॥ असा
रोपितनोरखंडपरमानंदावबोधस्पृशामस्तः कोपि शिवप्रसादसुलभः
संपत्स्यते योगिनं ॥ २४ ॥ त्वंयं वयंवयं त्वयमिति सामीन्मतिरावयो ॥ किंजा
तमधुना येन त्वंयं त्वंयं वयंवयं ॥ २४ ॥ मधे तिष्टति वाग्वियोषितां हृदि हा
लाहलमेव केवलं ॥ अनेन एव निपीतयंते परं हृदयं मुष्टिभिरेव ताड्यते ॥ २५ ॥ १०

ल्पः पर्यंको निजभुजलता गेंडुकः खं विताना दीपश्चंद्रो विरतिवनिताल
ब्धसंगप्रमोदः ॥ दिक्कमांतिः पवनचमरैर्वीज्यमानोनुकूलो भिक्षुः शेते
नृप इव ननु त्यक्तसर्वेषणोपि ॥ २६ ॥ ब्रह्मांडमंडलीमात्रं किं लाभाय मन
स्विनः ॥ शफरीस्फुरितेनाब्धेः क्षुब्धता जातु जायते ॥ २७ ॥ भिक्षाशी जनम
ध्यसंगरहितः स्वायत्तचेष्टः सदा हानादानविरक्तमार्गनिरतः कश्चित्त
पस्वीजनैः ॥ रथ्याजीर्णविकीर्णचीरवसनैः संप्राप्तकंथाधरो निर्मानो नि
रहंकृतिः ॥ शमसुखाभोगैकबद्धस्पृहः ॥ २८ ॥ कौपीनं शतखंडजर्जरतरं

कंथापुनस्तादृशीनैश्चिंत्यंनिरपेक्षभैक्ष्यमशनंनिद्राश्मशानेवने॥ स्वातंत्र्ये
णनिरंकुशंविहरणंस्वांतंप्रशांतंसदास्थैर्यंयोगमहोत्सवेपिचयदित्रै
लोक्यराज्येनकिं॥९९॥मातर्मेदिनितातमारुतसखेतेजःसबंधोजलंभ्रा
तर्व्योमनिबद्धएषभवतामंत्यःप्रणामांजलिः॥ युष्मत्संगवशोपजातसु
कृतस्फारस्फुरन्निर्मलज्ञानापास्तसमस्तमोहमहिमालीयेपरेब्रह्मणि
१००॥ इतिश्रीभर्तृहरिकृतंवैराग्यशतकंसमाप्तम्॥शुभमस्तु॥॥ ॥
सं॥१८३०॥फाल्गुणशुक्ले क्षेत्रनिवासेरा श्रीजागेश्वरप्रसादात्॥श्रीराम॥